## **Sri Narayana Suuktam**

oṃ saha nā'vavatu | saha nau' bhunaktu | saha vīryaṃ' karavāvahai |
tejasvināvadhī'tamastu mā vi'dviṣāvahai'' ||
oṃ śāṃtiḥ śāṃtiḥ śāṃtiḥ' ||

oṃ || sahasraśīr'ṣaṃ devaṃ viśvākṣaṃ' viśvaśaṃ'bhuvam |
viśvaṃ' nārāya'ṇaṃ devamakṣaraṃ' paramaṃ padam |

viśvataḥ para'mānnityaṃ viśvaṃ nā'rāyaṇagṃ ha'rim |
viśva'mevedaṃ puru'ṣa-stadviśva-mupa'jīvati |

patiṃ viśva'syātmeśva'ragaṃ śāśva'tagṃ śiva-ma'cyutam |
nārāyaṇaṃ ma'hājñeyaṃ viśvātmā'naṃ parāya'ṇam |

nārāyaṇapa'ro jyotirātmā nā'rāyaṇaḥ pa'raḥ |
nārāyaṇaparaṃ' brahma tattvaṃ nā'rāyaṇaḥ pa'raḥ |

nārāyaṇapa'ro dhyātā dhyānaṃ nā'rāyaṇaḥ pa'raḥ |
yacca' kiṃcijjagatsarvaṃ dṛśyate'' śrūyate'pi' vā ||

aṃta'rbahiśca' tatsarvaṃ vyāpya nā'rāyaṇaḥ sthi'taḥ |
anaṃtamavyayaṃ' kavigṃ sa'mudre'ṃtaṃ' viśvaśaṃ'bhuvam |

padmakośa-pra'tīkāśagaṃ hṛdayaṃ' cāpyadhomu'kham |
adho' niṣṭyā vi'tasyāṃte nābhyāmu'pari tiṣṭha'ti |

jvālamālāku'laṃ bhātī viśvasyā'yatanaṃ ma'hat |
saṃta'tagṃ śilābhi'stu laṃba'tyākośasanni'bham |

tasyāṃte' suṣiragṃ sūkṣmaṃ tasmin'' sarvaṃ prati'ṣṭhitam |
tasya madhye' mahāna'gni-rviśvārci'-rviśvato'mukhaḥ |

so'gra'bhugvibha'jaṃtiṣṭha-nnāhā'ramajaraḥ kaviḥ |
tiryagūrdhvama'dhaśśāyī raśmaya'stasya saṃta'tā |

saṃtāpaya'ti svaṃ dehamāpā'datalamasta'kaḥ |
tasya madhye vahni'śikhā aṇīyo''rdhvā vyavasthi'taḥ |

nīlato'-yada'madhyasthā-dvidhyulle'kheva bhāsva'rā |
nīvāraśūka'vattanvī pītā bhā''svatyaṇūpa'mā |

tasyā''ḥ śikhāyā ma'dhye paramā''tmā vyavasthi'taḥ |
sa brahma sa śivaḥ sa hariḥ seṃdraḥ so'kṣa'raḥ paramaḥ svarāṭ ||

ṛtagṃ satyaṃ pa'raṃ brahma puruṣaṃ' kṛṣṇapiṃga'lam |
ūrdhvare'taṃ vi'rūpākṣaṃ viśvarū'pāya vai namo namaḥ' ||

oṃ nārāyaṇāya' vidmahe' vāsudevāya' dhīmahi |
tanno' viṣṇuḥ pracodayā''t ||

oṃ śāṃtiḥ śāṃtiḥ śāṃtiḥ' ||

ॐ सह ना'ववतु । सह नौ' भुनक्तु । सह वीर्यं' करवावहै ।
तेजस्विनावधी'तमस्तु मा वि'द्विषावहै'' ॥
ॐ शांतिः शांतिः शांतिः' ॥

ॐ ॥ सहस्रशीर्'षं देवं विश्वाक्षं' विश्वशं'भुवम् ।
विश्वं' नाराय'णं देवमक्षरं' परमं पदम् ।

विश्वतः पर'मान्नित्यं विश्वं ना'रायणगं ह'रिम् ।
विश्व'मेवेदं पुरु'ष-स्तद्विश्व-मुप'जीवति ।

पतिं विश्व'स्यात्मेश्व'रगं शाश्व'तगं शिव-म'च्युतम् ।
नारायणं म'हाज्ञेयं विश्वात्मा'नं पराय'णम् ।

नारायणप'रो ज्योतिरात्मा ना'रायणः प'रः ।
नारायणपरं' ब्रह्म तत्त्वं ना'रायणः प'रः ।

नारायणप'रो ध्याता ध्यानं ना'रायणः प'रः ।
यच्च' किंचिज्जगत्सर्वं दृश्यते'' श्रूयतेऽपि' वा ॥

अंत'र्बहिश्च' तत्सर्वं व्याप्य ना'रायणः स्थि'तः ।
अनंतमव्ययं' कविगं स'मुद्रेऽंतं' विश्वशं'भुवम् ।

पद्मकोश-प्र'तीकाशगं हृदयं' चाप्यधोमु'ख़म् ।
अधो' निष्ट्या वि'तस्यांते नाभ्यामु'परि तिष्ठ'ति ।

ज्वालमालाकु'लं भाती विश्वस्या'यतनं म'हत् ।
संत'तगं शिलाभि'स्तु लंब'त्याकोशसन्नि'भम् ।

तस्यांते' सुषिरगं सूक्ष्मं तस्मिन्'' सर्वं प्रति'ष्ठितम् ।
तस्य मध्ये' महान'ग्नि-र्विश्वार्चि'-र्विश्वतो'मुख़ः ।

सोऽग्र'भुग्विभ'जंतिष्ठ-न्नाहा'रमजरः कविः ।
तिर्यगूर्ध्वम'धश्शायी रश्मय'स्तस्य संत'ता ।

संतापय'ति स्वं देहमापा'दतलमस्त'कः ।
तस्य मध्ये वह्नि'शिख़ा अणीयो''र्ध्वा व्यवस्थि'तः ।

नीलतो'-यद'मध्यस्था-द्विध्युल्ले'ख़ेव भास्व'रा ।
नीवारशूक'वत्तन्वी पीता भा''स्वत्यणूप'मा ।

तस्या''ः शिख़ाया म'ध्ये परमा''त्मा व्यवस्थि'तः ।
स ब्रह्म स शिवः स हरिः सेंद्रः सोऽक्ष'रः परमः स्वराट् ॥

ऋतगं् सत्यं प'रं ब्रह्म पुरुषं' कृष्णपिंग'लम् ।
ऊर्ध्वरे'तं वि'रूपाक्षं विश्वरू'पाय वै नमो नमः' ॥

ॐ नारायणाय' विद्महे' वासुदेवाय' धीमहि ।
तन्नो' विष्णुः प्रचोदया''त् ॥

ॐ शांतिः शांतिः शांतिः' ॥